International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

# याज्ञवल्क्यस्मृतौ प्रतिपादित विवाहानां भेदाः

**Dr chaitanya kumar bandi**
**Guest faculty, Dept of Dharmasastra**
**National sanskrit university, Tirupati**
**Ph. - 9676113384**

याज्ञवल्क्यशिष्यः कैश्चित् प्रश्नोतररूपं याज्ञवल्क्यमुनिप्रणीत धर्मशास्त्र संक्षिप्य कथयामास, यथा मनुप्रणीतं भृगुः इति ।[i]

याज्ञवल्क्यस्मृतौ दशाधिकं श्लोकसहस्रं (१०१०) विद्यते। व्याख्याभेदमनुसृत्य पञ्चषाणां श्लोकानां न्यूनाधिक्यमपि भवत्येव मनुस्मृतौ सप्तशताधिकद्विसहस्रश्लोकेषु (२७००) वर्णितान् विषयान् संक्षिप्य याज्ञवल्क्यो निरूपितवान्। रामचन्द्रडुमहोदयैरेवमुक्तम्- मनुस्मृतेरपि याज्ञवल्क्यस्मृतौ विषयप्रतिपादनं क्रमबद्धं पुनरुक्तिरहितं च इति । मनुस्मृतौ काव्यशैली तत्र तत्र दृश्यते। याज्ञवल्क्यस्मृतौ मनुस्मृतिश्लोकाः वाक्यानि पदानि च मनुस्मृतेर्गृहीतानि ततो याज्ञवल्क्यस्मृतिर्मनुस्मृत्यनुसारिणीति वक्तुं शक्यते । याज्ञवल्क्यस्मृतौ त्रयः अध्यायाः वर्तन्ते। १) आचाराध्यायः, २) व्यवहाराध्यायः, ३) प्रायश्चित्ताध्यायः इति अध्यायेष्वपि विषयान्अनुसृत्य प्रकरणविभागो विद्यते ।

आचाराध्याये उपोद्घातः, ब्रह्मचारिधर्माः, विवाहप्रकाराः, वर्णजातिविवेकः, गृहस्थधर्माः, स्नातकधर्माः, भक्ष्याभक्ष्यविचारः, द्रव्यशुद्धिः, दानं श्राद्धकल्पः, गणपतिकल्पः, ग्रहशान्तिः, राजधर्माः इत्येतेषु प्रकरणेषु विवाहप्रकारा : एकमेव |

**चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट् ॥**

**इत्युक्त्वा चरतां धर्म सह या दीयतेऽर्थिने।**

**स कायः पावयेत्तज्जः षट् षट् वंश्यान् सहात्मना ॥**

**आसुरो दविणादानात् गान्धर्वः समयान्मिथः ।**

**राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात् ॥**

**पाणिग्रह्यः सवर्णासु गृह्णीयात् क्षत्रिया शरम् ।**

**वैश्या प्रतोदमादाद्या द्वेदने त्वग्रजन्मनः ॥**[ii]

ये च गान्धर्वादयो विवाहा न धर्मसम्मताः इति यदुक्तं तत्र कारणमपि अपरार्कनामिकायां व्याख्यायामुदाहृतम्। ब्राह्म दैव आर्ष प्राजापत्य गान्धर्व भेदेषु चतुर्षु अग्निष्टोमं प्रसद्यते। कन्यादानसमकालमेव यद्यपि अग्निहोत्राधिकारः प्रवर्तते तथापि विवाहानन्तरं कार्ये यज्ञकर्मणि पूर्वोक्तचतुर्विधविवाहः परिणीताः एव अधिकृता भवन्ति अतश्चत्वारो विवाहाः श्रेष्ठाः इति नियमो ब्राह्मणस्यैव भवति गान्धर्वासुरयोः ब्राह्मणस्यैव निषेधः क्षत्रियवैश्ययोः अग्निहोत्राधिकारः ब्राह्मणः इव न परिहार्यः इति तत्र कारणं स्यात्। पैशाचराक्षसौ सर्वेषां निषिद्धौ ।

विवाहशब्दो यद्यपि कन्यायाः सप्तपदातिक्रमणे मुख्यः तथापि ऋत्विकं पृथक तत्तद् गृह्यादिशास्त्रविहित भार्यात्वसाधके कर्मसमुदाये वर्तते। स च समुदाय उपाधिभेदाद् ब्रह्मादिव्यपदेशं लभते तदुपाधित्वेनैव दानविवाहशब्दयोः सामानाधिकरण्यम् । यथा अलङ्कृत्यकन्यामुदकपूर्वं दद्यादेष ब्राह्मो विवाहः इति न पुनर्दानमेव विवाहशब्दार्थः तथा सति हि उदगयन अपूर्यमाणे पक्षे कल्याणे नक्षत्रे चौरकर्मोपनयनगोदानविवाहः इत्युक्त्वा यदुक्तं 'तेषां पुरुस्तच्चतस्त्र अज्याहुतीर्जुहुयात्' इति । तन्नोपपद्यते। न हि कन्यादानात् पुरस्तादेता आहुतयः सन्ति। तस्माद् दानविवाहयोर्भेदात्तदभिधानयोः पदयोः सामानाधिकरण्यमुपचारेणैव व्याख्येयम्। यत एव दानं न विवाहोऽत एव गान्धर्वादिषु विवाहेषु दानमन्तरेणैव उपयमनं कन्यास्वीकारात्मकं विवाहत्वेनाऽऽह शौनकः - 'मिथः समयं कृत्वोपयच्छेत स गान्धर्वः। मिथः परस्परं कन्यावरौ अहं ते भर्ता स्वं मे भार्येति सम्प्रतिपत्तिं कृत्वा कन्यामुपयच्छेत

International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

स्वीकुर्यादिति तस्यार्थः । ततोऽत्र दानं न विद्यते विवाहस्तु भवति अस्य च विवाहोत्तरेभ्यो भेदको धर्मः कन्यावरयोर्मिथः सम्प्रतिपत्तिः । एवं राक्षसपैशाचयोरपि विवाहत्वं कन्यादानरहितमेव द्रष्टव्यम्। युद्धं छलनं च तयोर्भेदकौ धर्मौ । तदाह- हत्वा भित्वा च शीर्षाणि रुदतीं रुदभ्यश्च हरेत्स राक्षसः । तथा पैशाचमपि

मनुराह -

**सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।**
**स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः ॥**

एवम् उपयमनपाणिग्रहणशब्दवत् परिणयनशब्दोऽपि दण्डिन्यायेनैव कर्मसमुदाये

शास्त्रेषु प्रयुज्यते (इति अपरार्कव्याख्या )।

---

[i] याज्ञवल्क्यस्मृतिः – पीठिका – पृ - ११
[ii] यज्ञवल्कस्मृतिः - आचाराध्यायः – श्लोक – 58-62


© 2022, IRJEdT Volume: 04 Issue: 11 | Nov-2022